श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री धन्वन्तर्यष्टोत्तरशतनामावलिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री धन्वन्तर्यष्टोत्तरशतनामावलिः ॥

| | |
|---|---|
| 1 | ओं धन्वन्तरये नमः |
| 2 | ओं सुधापूर्णकलशाढ्यकराय नमः |
| 3 | ओं हरये नमः |
| 4 | ओं जरामृतित्रस्तदेवप्रार्थनासाधकाय नमः |
| 5 | ओं प्रभवे नमः |
| 6 | ओं निर्विकल्पाय नमः |
| 7 | ओं निस्समानाय नमः |
| 8 | ओं मन्दस्मितमुखाम्बुजाय नमः |
| 9 | ओं आञ्जनेयप्रापिताद्रये नमः |
| 10 | ओं पार्श्वस्थविनतासुताय नमः |
| 11 | ओं निमग्नमन्दरधराय नमः |
| 12 | ओं कूर्मरूपिणे नमः |
| 13 | ओं बृहत्तनवे नमः |
| 14 | ओं नीलकुञ्चितकेशान्ताय नमः |
| 15 | ओं परमाद्भुतरूपधृते नमः |

| | |
|---|---|
| **16** | ओं कटाक्षवीक्षणाश्वस्तवासुकये नमः |
| **17** | ओं सिंहविक्रमाय नमः |
| **18** | ओं स्मर्तृहृद्रोगहरणाय नमः |
| **19** | ओं महाविष्ण्वंशसम्भवाय नमः |
| **20** | ओं प्रेक्षणीयोत्पलश्यामाय नमः |
| **21** | ओं आयुर्वेदाधिदैवताय नमः |
| **22** | ओं भेषजग्रहणानेहस्स्मरणीयपदाम्बुजाय नमः |
| **23** | ओं नवयौवनसम्पन्नाय नमः |
| **24** | ओं किरीटान्वितमस्तकाय नमः |
| **25** | ओं नक्रकुण्डलसंशोभिश्रवणद्वयशष्कुलये नमः |
| **26** | ओं दीर्घपीवरदोर्दण्डाय नमः |
| **27** | ओं कम्बुग्रीवाय नमः |
| **28** | ओं अम्बुजेक्षणाय नमः |
| **29** | ओं चतुर्भुजाय नमः |
| **30** | ओं शङ्खधराय नमः |
| **31** | ओं चक्रहस्ताय नमः |
| **32** | ओं वरप्रदाय नमः |
| **33** | ओं सुधापात्रोपरिलसदाम्रपत्रलसत्कराय नमः |

| | |
|---|---|
| **34** | ओं शतपद्माढ्यहस्ताय नमः |
| **35** | ओं कस्तूरीतिलकाञ्चिताय नमः |
| **36** | ओं सुकपोलाय नमः |
| **37** | ओं सुनासाय नमः |
| **38** | ओं सुन्दरभ्रूलताञ्चिताय नमः |
| **39** | ओं स्वङ्गुलीतलशोभाढ्याय नमः |
| **40** | ओं गूढजत्रवे नमः |
| **41** | ओं महाहनवे नमः |
| **42** | ओं दिव्याङ्गदलसद्बाहवे नमः |
| **43** | ओं केयूरपरिशोभिताय नमः |
| **44** | ओं विचित्ररत्नखचितवलयद्वयशोभिताय नमः |
| **45** | ओं समोल्लसत्सुजातांसाय नमः |
| **46** | ओं अङ्गुलीयविभूषिताय नमः |
| **47** | ओं सुधागन्धरसास्वादमिलद्भृङ्गमनोहराय नमः |
| **48** | ओं लक्ष्मीसमर्पितोत्फुल्लकञ्जमालालसद्गलाय नमः |
| **49** | ओं लक्ष्मीशोभितवक्षस्काय नमः |
| **50** | ओं वनमालाविराजिताय नमः |
| **51** | ओं नवरत्नमणीक्लृप्तहारशोभितकन्धराय नमः |

| | |
|---|---|
| **52** | ओं हीरनक्षत्रमालादिशोभारञ्जितदिङ्मुखाय नमः |
| **53** | ओं विरजोऽम्बरसंवीताय नमः |
| **54** | ओं विशालोरसे नमः |
| **55** | ओं पृथुश्रवसे नमः |
| **56** | ओं निम्ननाभये नमः |
| **57** | ओं सूक्ष्ममध्याय नमः |
| **58** | ओं स्थूलजङ्घाय नमः |
| **59** | ओं निरञ्जनाय नमः |
| **60** | ओं सुलक्षणपदाङ्गुष्ठाय नमः |
| **61** | ओं सर्वसामुद्रिकान्विताय नमः |
| **62** | ओं अलक्तकारक्तपादाय नमः |
| **63** | ओं मूर्तिमद्वार्धिपूजिताय नमः |
| **64** | ओं सुधार्थान्योन्यसंयुध्यद्देवदैतेयसान्त्वनाय नमः |
| **65** | ओं कोटिमन्मथसङ्काशाय नमः |
| **66** | ओं सर्वावयवसुन्दराय नमः |
| **67** | ओं अमृतास्वादनोद्युक्तदेवसङ्घपरिष्टुताय नमः |
| **68** | ओं पुष्पवर्षणसंयुक्तगन्धर्वकुलसेविताय नमः |
| **69** | ओं शङ्खतूर्यमृदङ्गादिसुवादित्राप्सरोवृताय नमः |

| | |
|---|---|
| **70** | ओं विष्वक्सेनादियुक्पार्श्वाय नमः |
| **71** | ओं सनकादिमुनिस्तुताय नमः |
| **72** | ओं साश्चर्यसस्मितचतुर्मुखनेत्रसमीक्षिताय नमः |
| **73** | ओं साशङ्कसभ्रमदितिदनुवंश्यसमीडिताय नमः |
| **74** | ओं नमनोन्मुखदेवादिमौलिरत्नलसत्पदाय नमः |
| **75** | ओं दिव्यतेजः पुञ्जरूपाय नमः |
| **76** | ओं सर्वदेवहितोत्सुकाय नमः |
| **77** | ओं स्वनिर्गमक्षुब्धदुग्धवाराशये नमः |
| **78** | ओं दुन्दुभिस्वनाय नमः |
| **79** | ओं गन्धर्वगीतापदानश्रवणोत्कमहामनसे नमः |
| **80** | ओं निष्किञ्चनजनप्रीताय नमः |
| **81** | ओं भवसंप्राप्तरोगहृते नमः |
| **82** | ओं अन्तर्हितसुधापात्राय नमः |
| **83** | ओं महात्मने नमः |
| **84** | ओं मायिकाग्रण्यै नमः |
| **85** | ओं क्षणार्धमोहिनीरूपाय नमः |
| **86** | ओं सर्वस्त्रीशुभलक्षणाय नमः |
| **87** | ओं मदमत्तेभगमनाय नमः |

| | |
|---|---|
| **88** | ओं सर्वलोकविमोहनाय नमः |
| **89** | ओं स्रंसन्नीवीग्रन्थिबन्धासक्तदिव्यकराङ्गुलये नमः |
| **90** | ओं रत्नदर्वीलसद्धस्ताय नमः |
| **91** | ओं देवदैत्यविभागकृते नमः |
| **92** | ओं सङ्ख्यातदेवतान्यासाय नमः |
| **93** | ओं दैत्यदानववञ्चकाय नमः |
| **94** | ओं देवामृतप्रदात्रे नमः |
| **95** | ओं परिवेषणहृष्टधिये नमः |
| **96** | ओं उन्मुखोन्मुखदैत्येन्द्रदन्तपङ्क्तिविभाजकाय नमः |
| **97** | ओं पुष्पवत्सुविनिर्दिष्टराहुरक्षःशिरोहराय नमः |
| **98** | ओं राहुकेतुग्रहस्थानपश्चाद्गतिविधायकाय नमः |
| **99** | ओं अमृतालाभनिर्विण्णयुध्यद्देवारिसूदनाय नमः |
| **100** | ओं गरुत्मद्वाहनारूढाय नमः |
| **101** | ओं सर्वेशस्तोत्रसंयुताय नमः |
| **102** | ओं स्वस्वाधिकारसन्तुष्टशक्रवह्न्यादिपूजिताय नमः |
| **103** | ओं मोहिनीदर्शनायातस्थाणुचित्तविमोहकाय नमः |
| **104** | ओं शचीस्वाहादिदिक्पालपत्नीमण्डलसन्नुताय नमः |
| **105** | ओं वेदान्तवेद्यमहिम्ने नमः |

| | |
|---|---|
| **106** | ओं सर्वलोकैकरक्षकाय नमः |
| **107** | ओं राजराजप्रपूज्याङ्घ्रये नमः |
| **108** | ओं चिन्तितार्थप्रदायकाय नमः |

॥ इति श्री धन्वन्तर्यष्टोत्तरशतनामावलिः समाप्ता ॥